## करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य । (३३/६०४)

स्तोक अल्प कृच्छ्र कतिपय इत्येतेभ्योऽसत्त्ववचनेभ्यः करणे कारके[1]ऽन्यतरस्यां तृतीया [2]भवति। पञ्चम्यत्र पक्षे विधीयते, तृतीया तु करणे इत्येव सिद्धा। यदा [3]तु धर्ममात्रं करणतया विवक्ष्यते न द्रव्यम्, तदा स्तोकादीनामसत्त्ववचनता। स्तोकान्मुक्तः, [4]स्तोकेन मुक्तः। [5]अल्पान् मुक्तः, अल्पेन मुक्तः। कृच्छ्रान्मुक्तः, कृच्छ्रेण मुक्तः। कतिपयान्मुक्तः, कतिपयेन मुक्तः। असत्त्ववचनस्य इति किम्? स्तोकेन [6]विषेण हतः। अल्पेन [7]मधुना मत्तः। करणे इति किम्? क्रियाविशेषणे कर्मणि मा भूत्, स्तोकं [8]मुञ्चति॥

## दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्। (३४/६११)

पञ्चमी [9]अनुवर्तते। दूरान्तिकार्थैः शब्दैर्योगे षष्ठी विभक्तिर्भवति, अन्यतरस्यां [10]पञ्चमी च। दूरं ग्रामस्य, दूरं ग्रामात् (म.भा. १.४५७)। विप्रकृष्टं ग्रामस्य, विप्रकृष्टं ग्रामात्। अन्तिकं ग्रामस्य, अन्तिकं ग्रामात्। अभ्याशं ग्रामस्य, अभ्याशं ग्रामात्। अन्यतरस्यांग्रहणं [11]पञ्चम्यर्थम्। इतरथा हि तृतीया पक्षे स्यात्॥

## दूरान्तिकार्थेभ्यो द्वितीया च। (३५/६०५)

पञ्चमी अनुवर्तते। दूरान्तिकार्थेभ्यः शब्देभ्यो द्वितीया विभक्तिर्भवति, चकारात् [12]पञ्चमी तृतीयाऽपि समुच्चीयते। दूरं ग्रामस्य, दूराद् ग्रामस्य, दूरेण ग्रामस्य (म.भा. १.४५७)। अन्तिकं ग्रामस्य, अन्तिकाद् ग्रामस्य, अन्तिकेन ग्रामस्य। [13]प्रातिपदिकार्थे विधानम्। असत्त्ववचनग्रहणं चानुवर्तते। [14]सत्त्वशब्देभ्यो यथायथं विभक्तयो भवन्ति। दूरः पन्थाः, दूराय पथे देहि[15], दूरस्य पथः स्वम्॥

## सप्तम्यधिकरणे च। (३६/६३३)

[16]सप्तमी विभक्तिर्भवत्यधिकरणे कारके, चकाराद् दूरान्तिकार्थेभ्यश्च। कटे आस्ते। शकटे आस्ते। [17]स्थाल्यां पचति। दूरान्तिकार्थेभ्यः खल्वपि – दूरे ग्रामस्य। अन्तिके ग्रामस्य। [18]अभ्याशे ग्रामस्य। दूरान्तिकार्थेभ्यश्चतस्रो विभक्तयो भवन्ति, द्वितीयातृतीयापञ्चमीसप्तम्यः।

[१३३] सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम्[19]। (म. भा. १.४५८)

अधीती व्याकरणे। [20]परिगणिती याज्ञिके। आम्नाती छन्दसि।

---

1. अन्यतरस्यां नास्ति ग. 2. विभक्तिः इत्यधिकम् फ. 3. च ड. इ, धर्म्यमात्रं ड. 4–5. स्तोकेन मुक्तः, अल्पान्मुक्तः नास्ति ह. 6. विषयेण ह. 7. सीधुना ड. फ. ह. 8. पचति ब. क, चलति ड, चरति ह. 9. इति वर्तते ह. 10. पञ्चमी च नास्ति क. फ, च नास्ति ब. 11. तृतीयार्थं ह 12. पञ्चमीवत् क, पञ्चमी वा तृतीया च ड, पञ्चमी तृतीया च इ. 13. प्रातिपदिकस्य अर्थे ड. 14. सत्त्ववचनेभ्यः ड. इ. ग, सत्त्वशब्देभ्यो हि क. 15. इति इत्यधिकम् फ. 16. अधिकरणे कारके सप्तमी° क. 17. उदाहरणमिदं नास्ति क. ड. 18. उदाहरणमिदं नास्ति क. ड. 19. कर्तव्यम् इत्यधिकम् इ. 20. परिगृहीती ड, याज्ञिक्ये फ. ह.